यौगिकः। ज्योतिष्टोमे चत्वारश्चमसाः सन्ति होत्रुद्गात्रध्वर्युयजमानसंज्ञकाः।

54. सर्वे द्रव्यविधयो नियमविधयः।

55. संनिपत्य द्रव्यादिषु संबध्योपकुर्वान्ति यानि तानि संनिपत्योपकारकानि, गुणकर्माणि इति वा उच्यन्ते।

आरात् साक्षात् द्रव्यादिसम्बन्धमनपेक्ष्योपकुर्वन्ति यानि तानि आरादुपकारकानि। प्रधानकर्माणि इति वा उच्यन्ते।

56. उलूखलम्, मुसलम्, कृष्णाजिनम्, दृषदुपले, इत्यादीनि पुरोडाशपात्राणि। कुम्भी, शाखापवित्रम्, अपिधानी, दोहनपात्रम्, इत्यादीनि सान्नायपात्राणि।

57. यागादौ त्रयोऽंशाः सन्ति – उद्देशांशः, त्यागांशः, प्रक्षेपांशश्चेति।

58. यद्दैवत्यः पशुः तद्दैवत्यः पुरोडाशः-इति विधानात्।।

59. एकस्मिन्नर्थे प्रसरः = वृत्तिः यस्या सा, एकः प्रसरो ययोः तयोर्भाव इति वा एकप्रसरता। समासेनावगतैकार्थप्रतिपादकत्वरूपसामर्थ्यभङ्गो भवेदित्यर्थः।

60. श्रुतिना तु विरोधे च नैवं वचनसम्भवे।
यथाश्रुत्यैव हि न्याय्यं अर्थस्य परिकल्पनम्।।
यतः प्रयोजनवशेन यः क्रमः कल्प्यते सोऽर्थक्रमः, अतः यथा श्रुत्यैव तत्कल्पनं न्याय्य इति तयोर्न विरोधः।

61. शयानवत्सजान्वाद्याकृतिविशिष्टदर्भमुष्टिविशेषो वेदः। सम्मार्जनखननोद्धननादिभिस्संस्कारैः संस्कृता आहवनीयगार्हयत्ययोर्मध्ये चतुरङ्गुलं निखाता भूमिः वेदिः। तच्च हविर्विधानस्थापनस्थानविशेषरूपं।

62. "याज्यया अधि वषट् करोति" इत्यनेन विध्यनुसारेण

| अध्वर्युः | तेनैव (अध्वर्युणा) | होत्रा | अध्वयुः | होत्रा |
|---|---|---|---|---|
| द्रव्यत्यागः करोति | 'अनुब्रूहि' इत्यादेशः | पुरोनुवाक्या पाठः | "यज" इत्यादेशः | याज्यामन्त्र पाठः करोति। |

तदनन्तरं होता एव वषट् करोति, अतः तस्य नाम "वषट्कार" इति।

63. स्वार्थचोदितदेवताराहित्यं अव्यक्तत्वं। द्रव्यराहित्यं वा।



64. अननुष्ठाने प्रत्यवायजनकत्वे सत्यनुष्ठाने च चित्तशुद्ध्यतिरिक्त फलाजनकत्वं (वेदान्तमते) ब्रह्मलोकप्रापकत्वं (मीमांसामते) नित्यकर्मत्वम्।

65. तपः श्रुतञ्च योनिश्च ह्येतद्ब्राह्मण कारणं।
तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः।।

66. त्रीणि ह वै यज्ञस्योदराणि गायत्रीबृहत्यनुष्टुप्।
अत्र ह्येवावपन्ति अत एवोद्वपन्ति।।

67. भागरूपनामभ्यो धेयः (व्याकरण वार्तिकं)।

68. गुणस्य विधेयत्वं फलस्य च उद्देश्यत्वं अङ्गीकारात्,
द्वयोर्मध्ये न एकोऽपि सम्भवति।

69. प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ्।
पर्युदासः सो विज्ञेयो यत्रोत्तरपदेन नञ्।।

70. चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च।
हूयते च पुनर्द्वाभ्यां स नो विष्णुः प्रसीदतु।।(तै सं 1.6.11)
अर्थात् – चतुर्भिश्च = आश्रावय, चतुर्भिश्च = अस्तु श्रौषट्, द्वाभ्यां = यज, पञ्चभिरेव = ये यजामहे च। हूयते च पुनर्द्वाभ्यां = वौषट्, स नो विष्णुः प्रसीदतु।

71. येन स्तोत्रेण क्रतूपरम्यते सा संस्था।
सा च सप्तधा। तथाहि –






Created by demo-version of Universal Document Converter. Full version doesn't ad
WWW.PRINT-DRIVER.COM